मुखं प्रथमो देवतानामिति" मन्त्रः । "अग्निर्वै देवानामवम इति" ब्राह्मणम् । तथा तैत्तिरीयाश्चामनन्ति । "अग्निरग्रे प्रथमो देवतानामिति" मन्त्रः । "अग्निरवमो देवतानामिति" च । वाजसनेयिनस्त्वेवमामनन्ति । "स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नामेति" । यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रं पूर्व्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तम् । सन्नममानः सम्यक् स्वयमेव प्रह्वीभवन्नङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम् । स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदक्नोपन इत्यग्निशब्दं निर्वक्ति । तत्र न क्नोपयतीत्युक्ते न स्नेहयति किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति । शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते । इतः इण् गतौ इति धातुः । अक्तोऽञ्जु व्यक्तिम्रक्षणगतिषु इति धातुः । दग्धो दह भस्मीकरणे इति धातुः । नीतो णीञ् प्रापणे इति धातुः । अग्निशब्दो ह्यकारगकारनिशब्दानपेक्षमाण एतिधातोरुत्पन्नादयनशब्दादकारमादत्ते । अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते । यद्वा दहति धातुजन्याद्दग्धशब्दाद्गकारमादत्ते । नीरिति नयतिधातुः स च ह्रस्वो भूत्वा परो भवति । ततो धातुत्रयं मिलित्वाग्निशब्दो भवति । यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविःपाके च प्रेरयतीति समुदायार्थः । तस्याग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिदर्शनायैषाग्निमीळे इत्यृग्भवतीति" ऋग्वेदभाष्ये माधवाचार्य्यः एतस्य वैश्वानरादिशब्दप्रवृत्तिनिमित्तदर्शनेनानेकास्तुतयो यास्केन दर्शितास्ताश्च तत्तच्छब्दावसरे दर्शयिष्यन्ते ।

**अग्निक** पु० अग्निवत् कायति प्रकाशते कै-क । इन्द्रगोपकीटे ।

**अग्निकण** पु० अग्नेः कणः ६त० । अग्निच्युतक्षुद्रांशे ।

**अग्निकर्म्मन्** न० अग्नौ कर्म्म ७त० । होमे अग्निहोत्रादौ "अग्निकर्म्म ततः कृत्वेति" स्मृतिः अग्निकार्य्यादयोऽप्यत्र न० ।

**अग्निकला** स्त्री ६त० अग्नेरवयवभेदे । सा च दशविधा तासाञ्च यादिक्षान्तवर्णदेवतात्वं यथोक्तं शारदातिलके । "धूमार्च्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी । सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि । यादीनां दशवर्णानां कला धर्म्मप्रदा अमूः" इति ।

**अग्निकारिका** स्त्री अग्निं करोति आधत्ते करणे कर्त्तृत्वोपचारात् कर्त्तरि ण्वुल् । अग्न्याधानसाधनेऽग्नीध्रायामृचि । सा च अग्निं दूतं पुरोदधे, इत्याद्या यजुर्वेदे एवमन्यवेदेऽप्यनुसन्धेया ।

**अग्निकाष्ठ** न० अग्नेः उद्दीपनं काष्ठम् शा०त० । अगुरुकाष्ठे ।

**अग्निकुक्कुट** पु० अग्नेः कुक्कुट इव रक्तवर्णस्फुलिङ्गवत्त्वात् । ज्वलदग्निव्याप्ततृणपुञ्जे (नुडा) इति ख्याते ।

**अग्निकुण्ड** न० अग्नेराधानार्थं कुण्डम् । अग्न्याधानार्थे स्थानभेदे तत्स्थानविवरणं कुण्डशब्देऽनुसन्धेयम् ।

**अग्निकुमार** पु० ६त० । कार्त्तिकेये तस्याग्निरेतोजातत्वमुक्तं महाभारते वनपर्व्वणि२२३ अध्याये सप्तर्षिपत्नीरूपदर्शनात् जातस्मरविकारस्याग्नेस्तेषां गार्हपत्य-प्रवेशेन अनिशं तद्दर्शनेन जाताधिकविकार तयानिर्वेदपूर्व्वकं वनगमनमुपक्रम्य, "स्वाहा तं दक्षदुहिता प्रथमं कामयत्तदा ॥ सा तस्य छिद्रमन्वैच्छच्चिरात् प्रभृति भाविनी । अप्रमत्तस्य देवस्य न चापश्यदनिन्दिता ॥ सा तं ज्ञात्वा यथावत्तु वह्निं वनमुपागतम् । तत्त्वतः कामसन्तप्तं चिन्तयामास भाविनी ॥ अहं सप्तर्षिपत्नीनां कृत्वा रूपाणि पावकम् । कामयिष्यामि कामार्त्तं तासां रूपेण मोहितम् ॥ एवं कृते प्रीतिरस्य कामावाप्तिश्च मे भवेत् ॥ २२३ अध्या० मार्कण्डेय उवाच । शिवा भार्य्या त्वङ्गिरसः शीलरूपगुणान्विता । तस्याः सा प्रथमं रूपं कृत्वा देवी जनाधिप । जगाम पावकाभ्याशं तञ्चोवाच वराङ्गना ॥ मामग्ने! कामसन्तप्तां त्वं कामयितुमर्हसि । करिष्यसि न चेदेवं मृतां मामुपधारय ॥ अहमङ्गिरसो भार्य्या शिवा नाम हुताशन! । शिष्टाभिः प्रहिता प्राप्ता मन्त्रयित्वा विनिश्चयम् ॥ अग्निरुवाच । कथं मां त्वं विजानीषे कामार्त्तमितराः कथम् । यास्त्वया कीर्त्तिताः सर्व्वाः सप्तर्षीणां प्रियाः स्त्रियः ॥ शिवोवाच । अस्माकं त्वं प्रियो नित्यं बिभीमस्तु वयं तव । त्वच्चित्तमिङ्गितैर्ज्ञात्वा प्रेषितास्मि तवान्तिकम् ॥ मैथुनायेह संप्राप्ता कामं प्राप्तुं द्रुतं चर । यातरो मां प्रतीक्षन्ते गमिष्यामि हुताशन! ॥ मार्कण्डेय उवाच । ततोऽग्निरुपयेमे तां शिवां प्रीतिमुदायुतः । प्रीत्या देवी समायुक्ता शुक्रं जग्राह पाणिना ॥ व्यचिन्तयन्ममेदं ये रूपं द्रक्ष्यन्ति कानने । ते ब्राह्मणीनामनृतं दोषं वक्ष्यन्ति पावके ॥ तस्मादेतद्रक्षमाणा गरुडी संभवाम्यहम् । वनान्निर्गमनञ्चैव सुखं मम भविष्यति ॥ मार्कण्डेय उवाच । सुपर्णी सा तदा भूत्वा निर्जगाम महावनात् । अपश्यत् पर्व्वतं श्वेतं शरस्तम्बैः सुसंवृतम् ॥ दृष्टिविषैः सप्तशीर्षैर्गुप्तं